# पर्यावरणसंरक्षणविषये वैदिकचिन्तनम्

खोकनदास:
शोधछात्र:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 6, Issue 3
Page Number : 49-54

**Publication Issue :**
May-June-2023

**Article History**
Accepted : 01 June 2023
Published : 12 June 2023

**सारांश**: -सर्वं जगत् भवति नाम पर्यावरणाधीनम्। अर्थात् तेजो वायु: जलं, मृत्तिका, मरु: पर्वता: वनानि वृक्षा: जीवा इत्यादीनि तत्त्वानि सम्मिल्य पर्यावरणं निर्मान्ति। अधुना सम्पूर्णविश्वस्य समक्षं या: समस्या: विद्यन्ते तासु पर्यावरणस्य समस्याया: - स्थानं प्रमुखतमस्ति। अत एव पर्यावरणसमस्याया: सीमाङ्कनं किं भविष्यति इति विषय: विचारणीय:। अत एव साहित्यशास्त्रे कविकालिदासेन पर्यावरणविषये किं किं चिन्तितम् इति मनसि निभाल्य मया पर्यावरणसंरक्षणविषये वैदिकचिन्तनम् इति शीर्षकमाश्रित्य लेख: विलिखित:।

**विशेषशब्दा**: - वायुप्रदुषणं तस्य निदानञ्च ,जलप्रदूषणं तस्य निदानञ्च, ध्वनिप्रदूषणं तस्य निदानञ्च, खाद्यप्रदूषणं तस्य निदानम्, पृथिवीप्रदुषणस्य वनस्पतिप्रदुषणस्य च निदानम् इत्यादय:।

**भूमिका-** वर्तमानसमये पर्यावरणस्य विचार: विश्वे विश्वस्मिन् सर्वत्र अवलोक्यते। पर्यावरणस्य दुष्प्रभाव:न केवलं पशु-पक्षिमानवेषु , अपितु वनस्पतिष्वपि पर्यलक्ष्यते। अत: सर्वत्र एतद्विषयिनी चिन्ता दृग्गोचरी भवति पर्यावरणं किमिति जिज्ञासायां कथयितुं शक्यते यत् परि+आ+वृ धातो: ल्युटि कृते निष्पद्यते शब्दोऽयम्। आङ्गलभाषायां प्रयुक्तम्- ENVIRONMENT पदमिदमेवार्थं बोधयति। पर्यावरणस्य असन्तुलनस्य समस्या वर्तते प्रदूषण आङ्गलभाषायाम् POLLUTION शब्द अस्मिन्नेवार्थे प्रयुक्त: । जलस्थलवायापदार्थेषु अनीप्सितहानिप्रदपदार्थानां सम्मेलनमेवाथवा उपयोगीपदार्थानां भाव एव प्रदुषणमिति कथ्यते।

भारतस्य मनीषिभि: पूर्वं वर्षसहस्रं मानवजीवनस्य कल्यानाय पर्यावरणस्य महत्त्वं तथा तस्य सुरक्षा, प्रकृत्या सह सान्निध्यं संवेदनशीलता रोगोपकार: तथा स्वास्थ्यसम्वन्धीनि नैकानि तत्त्वानि अन्वेषितानि। वेदकालिके समाजे मनीषिणां न केवलं पर्यावरणं प्रति दृष्टिरेवासीत् प्रत्युत तस्य रक्षा महत्त्वञ्चापि स्पष्टीकृतं तै:। तेषां दृष्टि: पर्यावरणप्रदुणं प्रति आसीत् तस्मात् प्रत्यक्षरूपेण परोक्षरूपेण वा पर्यावरणं रक्षित: तै: तथा पर्यावरणमक्षणं प्रति समाजस्य ध्यानम् आकृष्टम्। तै: भूमि: ईश्वरस्य रूपं मन्यते स्म। पर्यावरणरक्षणं तेषां पूजनस्य एकम् अविभाज्यम् अङ्गमासीत्। यथा अथर्ववेदे प्रोक्तम्-

**"यस्य भूमि: प्रमाऽन्तरिक्षमुतोदरम् ।**
**दिवं यश्चक्रे मूर्धानं तस्मै जेष्ढाय ब्रह्मणे नम:।।"**[i] **इति ।**

अर्थात् यस्य भूमि: पादस्थानीया, अन्तरिक्षम् उदरं तथा द्युलोक: मस्तक: वर्तते तस्मै श्रेष्ठाय ब्रह्मणे नम:। ऋग्वेदे वर्षर्तुम् उत्सवं मत्वा शस्य-श्यामलया प्रकृत्या सह हार्दिकी प्रसन्नता अभिव्यक्तीकृता। यथा ऋग्वेदे उक्तम्-

**"ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्त:।**[ii]
**संवत्सरस्य तदह: परि ष्ठ यन्मण्डुका: प्रावृषीणं वभुव।।" इति ।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अर्थात् दुर्दराः यथा वर्षतौ प्रथमायाः वृष्टेः अनन्तरं सरः पूर्णं भवेत् इति कामनया परितः भ्रमन्ति गायन्ति च, तथैव हे ब्राह्मणाः। भवन्तोऽपि रात्रेरनन्तरं ब्राह्मे मुहूर्ते सौम्यवृद्धिकाले वेदध्वनिना परमेश्वरस्य यज्ञवर्णनं कुर्मः वर्षतुः आगमनम् उत्सवमिव मान्येयुः।

वेदेषु पर्यावरणम् अनेकेषु भागेषु विभक्तुं शक्यते। यथा वायु-जल-ध्वनि-खाद्य-मृत्तिका-वनस्पति-पशु-पक्षिप्रभृतयः। सजीवजगति पर्यावरणरक्षायै वायोः स्वच्छता प्रथमं स्थानं निदधाति। प्राणवायुं विना जीवनं न सम्भवति। ईश्वरेण सम्पूर्णपृथिवी वायुना परिपुर्णा कृताऽस्ति। यदा अस्माकं शरीरे रक्तवाहिनीषु वहन्तं रक्तं बहिर्भवितुं प्रयतते, तदा वायुः इदं सन्तुलितं करोति। अन्यथा नाडयः विनष्टा भूत्वा जीवनं नष्टं कुर्युः। वायुः अस्मात् रक्षति। वृक्षादयः दूषितं वायुं गृहीत्वा प्राणवायुम् अस्मभ्यः ददति। एवम्प्रकारेण वायुशुद्धिद्वारा वृक्षादयः अस्माकं प्राणरक्षां कुर्वन्ति।

**वायुप्रदुषणं तस्य निदानञ्च** – वायोः शुद्धिः जीवनाय सर्वाधिकं महत्वपूर्णमस्ति। वायुरपि द्विविधो भवति- 1. श्वासयोग्यः शुद्धवायुः 2.जीवनमात्रस्य कृते हानिकारको दूषितवायुः । ऋग्वेदे उच्यते –

**"द्वाविमौ वातौ वात आ सिन्धोरा परावतः।**[iii]

**दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः।।" इति ।**

अर्थात् प्रत्यक्षभूतौ उभावपि वायुसागरपर्यन्तं तथा समुद्रात् दूरदेशपर्यन्तं वहतः। हे साधाक! एकेन तु तुभ्यं बलं प्रदीयते द्वितीयश्च दूषितः वायुः दूरीक्रियते।

पर्वं वर्षसहस्रम् अस्माकं पूर्वजनानाम् इदमज्ञानम् आसीत् यत् वायौ वहुविधानां गैसानां संमिश्रेम वर्तते । येषां पृथक् पृथक् गुणाः अवगुणाश्च वर्तन्ते। अत्रैव प्राणवायुरपि विद्यते। यथा ऋग्वेदे उक्तम्-

**"यददौ वात ते गृहेऽमृतस्य निधिर्हितः।**[iv]

**ततो न देहि जीवसे।।" इति ।**

अस्य अयं भावः वर्तते यत् वायौ गृहे यत् अमरत्वं निधिरूपेण स्थापितं विद्यते तद् अस्माकं जीवनस्य कृते आवश्यकमस्ति।

शुद्धवायुः अनेकेषु रोगेषु औषधि इव कार्यं करोति। यथा ऋग्वेदे उच्यते –

**"आ त्वागमं शान्तातिभिरथो अरिष्टतातिभिः।**[v]

**दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते।।" इति ।**

अर्थात् शुद्धवायुः तपेदिक् इव घातकरोगाणां कृते औषधिः वर्तते। हे रुग्नमनुष्य ! अहं वैद्यः तव समीपे सुखकराय अहिंसाकराय च रक्षणाय आगतोऽस्मि। तव कृते कल्याणकरं बलं शुद्धवायुना आनयामि तथा जीर्णं रोगं दूरीकरोमि। हृदयरोग-तपेदिक-निमोनिया-प्रभृतिषु रोगोषु बहिर्भूतैः साधनैः ग्रहणम् आवश्यकं भवति। अत्र अयं संकेतोऽस्ति

**"वात आ वातु भेषजं शंभु मयोभु नो हृदे।**[vi]

**प्र ण आयुषि तारिषत्।।" इति ।**

अर्थात् शुद्धस्वच्छवायुः अमुल्यः औषधिः वर्तते, य अस्माकं हृदयस्य कृते औषधि इव उपयोगी आनन्ददायकश्च विद्यते। स त्वं शुद्धवायुम् अस्मान् प्रापयति तथा अस्माकं आयुः वर्धयति।

**जलप्रदूषणं तस्य निदानञ्च-**

जलस्य वहुविधः उपयोगः भवति। जलं जीवनं मन्यते । किन्तु अपशिष्टपदार्थानाम् अवकरादीनां जलस्रोतेषु नद्यादिषु स्म्मेलनात् जलं प्रदूषितं क्रियते इदानीम्। वेदेषु जलप्रदूषणसमस्या विस्तरेण चर्चिताऽस्ति। गृहस्य समीपे एव शुद्धजलयुक्तः एकः जलाशयः भवेत्। अथर्ववेदे उक्तम्–

**"इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः।**[vii]

**गृहानुप प्र सीदाम्यमृतेन सहाग्निना।।" इति।**

अर्थात् सर्वतोभावेन रोगरोहितं तथा रोगनाशकम् इव जलम् अहम् आनयामि । शुद्धजलपानेन अहं सुरक्षितं स्थास्यामि। अन्न–घृत– दुग्धादिसामग्रीसहितेषु अग्निसहितेषु च गृहेषु आगत्य सम्यक्प्रकारेण तिष्ठामि।

शुद्दजलं मनुष्याय दीर्घायुषः प्रदायकं प्राणरक्षणं कल्याणकारि च वर्तते। ऋग्वेदे यथा उक्तम्–

**"शं नो देवीरभिष्टय आपो भवन्तु पीतये।**[viii]

**शं योरभि स्रवन्तु नः।।" इति ।**

अर्थात् सुखमयं जलम् अस्माकम् अभिष्टप्राप्तये रक्षायै च कल्याणकारि भवेत्। जलं अस्मत्सु सुखसमृद्धेः वर्षा कुर्यात्।

जलं मुखाकृतेः सौन्दर्यस्य, कोमलतायाः कान्तेश्च वर्धापने औषधिः वर्तते । भोजनस्य पाचने जलाधिकस्य पानम् आवश्यकं भवति। यथा अथर्ववेदे उच्यते –

**"आपो भद्रा घृतमिदाप आसन्नग्नीषोमौ बिभ्रत्याप इत्ताः।**[ix]

**तीव्रौ रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसा गमेत्।।" इति ।**

मन्त्रेऽस्मिन् भावः वर्तते यत् जलं मङ्गलमयं तथा घृतमिव पुष्टिदातृ अस्ति। तदेव मधुरतायुक्तानां जलधाराणां स्रोतेऽपि वर्तते। भोजनपाचनोपयोगी तीव्रः रसः विद्यते। प्राणदायकं कान्तिदायकं वलदायकं पौरुषदायकम् अमरतादायकञ्च मूलतत्त्वमस्ति । अत्र अयम् आशयः वर्तते यत् जलस्य उचितप्रयोगेण प्राणिनां बलं ,तेजः दृष्टिः, श्रवणशक्तयश्च वृद्धिं प्राप्नुवन्ति।

एकस्याम् ऋचौ उक्तमस्ति यत् जलेन दर्शनस्य, श्रवणस्य वदनस्य च शक्तिः वृद्धिं प्राप्नोति। बुभुक्षायाः ,दुःखस्य, चिन्तायाः मृत्योश्च त्यागपूर्वकः आनन्दः प्राप्यते। अथर्ववेदे यदा उक्तम्–

**"आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ् मासाम्।**[x]

**मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः।।" इति ।**

अस्य तात्पर्यम् इदमस्ति यत् दर्शनस्य, श्रवणस्य वदनस्य च शक्तिः पर्याप्तं जलोपयोगं विना न आगच्छति। जलं जीवनाधारोऽस्ति। प्रायः जीवः जले जन्म गृह्णन्ति तत्रैवच निवसन्ति । हे जलधारकाः! मम समीपे आगच्छत, यूयम् अमृताः स्त।

कृषिकर्मणः विषये जलस्य महत्वं निम्नायाम् ऋचि विद्यते। पावृषि कृषकाणां नेत्राणि सदा मेघं प्रति एव भवति। यथा ऋग्वेदे उक्तम्–

**"तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।**[xi]

**आपो जनयथा च नः।।" इति ।**

अर्थात् हे जल! त्वम् अन्नप्राप्यते उपयोगि अस्ति। तवोपरि जीवनं, नानाविधाः औषधयः, वनस्पतयः, अन्नादयश्च पदार्थाः निर्भराः सन्ति। त्वम् औषधिरूपमसि।

**ध्वनिप्रदूषणं तस्य निदानञ्च –**

धार्मिकगीतानां गानं, धर्मग्रन्थानां, पारायणं, भगवत: गुणगनादिकञ्च मानवजीवनस्य कल्यानाय आवश्यकं तत्वं वर्तते। परं दुःखं वर्तते यत् इदानीं ध्वनिविस्तारकैः विविधयन्त्रै:, अन्यविशालयन्त्रै:, वाहनादिभिश्च ध्वनिप्रदूषणं क्रियते। येन शिरोवेदना, अनिद्रादय:, अनेके रोगा: समुत्पन्ना भवन्ति। वेदे स्वास्थ्यस्य दृष्ट्या परस्परं शनैः शनैः मधुरञ्च वक्तुं मानवा: उपदिष्टा:। यथा अथर्ववेदे उक्तम् –

**"मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।**[xii]

**सम्यञ्चः सव्रता भुत्वा वाचं वदत भद्रया ।।" इति ।**

अर्थात् भ्राता भात्रा, भगिनी भगिन्या सह अथवा परिवारे कोऽपि परस्परं द्वेषं न कुर्यात् । सर्वेषु सदस्येषु मतैक्यं भवेत् तथा एकव्रतिनो भूत्वा मिथ: शान्त्या भद्रपुरुषाणामिव मधुरतया च वार्तालापं कुर्यु:। यथा अथर्ववेदे उक्तम्–

**"जिव्हाया अग्रे मधु मे जिव्हामूले मधूलकम्।**[xiii]

**ममेदह क्रतावसो मम चित्तमुपायसि।।" इति ।**

अर्थात् मम जिह्वात: मधुर: शब्द: नि:सरेत्। भगवत: भजनपूजन–कीर्तनकाले मूले मधुरता भवेत्।

**खाद्यप्रदूषणं तस्य निदानम् -**

वेदा: खाद्यसम्बन्धे वैज्ञानिकरीत्या निष्कर्षयन्ति । यथा मनुष्य: पाचनशक्त्या भोजनं सम्यक्प्रकारेण स्वयं पाचयतु। येन स शारीरिकम् आत्मिकञ्च बलं वर्धयित्वा पाचनशक्तिं सुखदायिकीं कर्तुं समर्थो भवेत्। एवमेव जलदुग्धादीनां पेयपदार्थानां विषयेऽपि उल्लेख: वर्तते। अथर्ववेदे उक्तं यथा–

**"यत् पिबामि सं पिबामि समुद्र इव संपिब:।**[xiv]

**प्राणानामुष्य संपाय सं पिबामो अमुं वयम्।।" इति ।**

अर्थात् यत्किमपि पिवामि, यथाविधि पिवामि, यथा यथाविधि पिब: समुद्र: पिवति। दुग्धजलादिक: पेयपदार्थ: अस्माभि: उचितरीत्या पेय: । यत्किमपि खादेम सम्यक्प्रकारेण चर्बयित्वा खादेम। यथा अथर्ववेदे उक्तं –

**" यद् गिरामि सं गिरामि समुद्र इव संगिर:।**[xv]

**प्राणानामुष्य संगीर्य सं गिरामो अमुं वयम्।।" इति।**

अर्थात् यं कञ्चिदपि खाद्यपदार्थं वयं खादेम, तं यथाविधि खादेम, तत्र शीघ्रता भवेत्। सम्यक्तया चर्वयित्वा शान्तिपूर्वकं खादेम। यथा यथाविधि संगिर: सागर: सर्वं पचति । वयं शाक–फल–अन्नादिकं रसवर्धकं खाद्यपदार्थं खादेम।

**पृथिवीप्रदुषणस्य वनस्पतिप्रदुषणस्य च निदानम्** –

अथर्ववेदस्य द्वादशकाण्डे प्रथमसूक्ते पृथिव्या: महत्त्वं प्रतिपादितम्। तत्र सर्वे प्राणिन: पृथिव्या: पुत्रा: निर्दिष्टा: –

**माता भूमि: पुत्रो अहं पृथिव्या:।**

पृथिव्या: निर्माणविषये अथर्ववेदे उक्तम्–

**"शिला भूमिरस्मा पांसु: सा भूमि: संधृता धृता।**[xvi]

**तस्यै हिरण्यवक्षसे पृथिव्या अकरं नम:।।" इति।**

अर्थात् भूमि: शिला-मृत्तिका-अश्मनां समाहार: विद्यते। अहं तस्या एव हिरण्यगर्भापृथिव्यै स्वागत-वचनं वदामि। नानाविधं फलं, औषधय: ,शस्यम्, अन्नं वृक्षादयश्च पृथिव्यामेव उत्पन्ना: भवन्ति। तेषामुपरि एव अस्माकं भोजनम् आधारितमस्ति। अत: पृथिवी माता इव आदृत्या विद्यते। अथर्ववेदे यथा उक्तम् -

**"यस्यामन्नं व्रीहियवौ यस्मा इमा: पञ्च कृष्टय:।**[xvii]

**भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे।।" इति ।**

अस्य अयम् आशय: विद्यते यत् सर्वे भोजनसम्वन्धि-पदार्थ: स्वास्थ्यवर्धका: ,वनस्पत्य: अस्यामेव भूमौ उत्पन्ना: भवन्ति। पृथिवी समेषां वनस्पतीनां माता विद्यते मेघश्च पिता , यतोहि वृष्टिरूपेण जलं वाहयित्वा स पृथिव्यां गर्भाधानं करोति।

पृथिव्यां न केवलं नानाविधं रत्नम् अपितु जलं खाद्यान्नं कन्दमूलञ्चापि पर्याप्तं प्राप्यते। कुशलमनुष्येण तेषां लाभ: ग्राह्य:। यथा अथर्ववेदे उक्तम् -

**"यामन्वैच्छद्धविषा विश्वकर्मान्तरर्णवे रजसि प्रविष्टाम्।**[xviii]

**भुजिष्यं पात्रं निहितं गुहा यदाविर्भोगे अभवन्मातृमद्भ्य:।।" इति।**

अर्थात् कुशलमनुष्य: पृथिवीतलस्य नीच्चै: कन्दमूलं खाद्यान्नञ्च अन्विष्य जीवनस्य विकासं करोति।

**उपसंहार:**

सर्वाणि रम्याणि तत्त्वजातानि सर्वेषां प्राणिनां पालनं कुर्वन्ति । यदि एतानि तत्त्वानि परिशुद्धानि सन्ति तदा प्राणिन: सुखैर्जीवनं यापयन्ति। परन्तु वयं स्वपृथिव्या सह न्यायं न कुर्म:। नगरीकरणस्य, औद्योगिकीकरणस्य कारणात् वनं नष्टं क्रियते। पृथिवी शिथिला भवति । पृथिव्या: उर्वराशक्ति नष्टा भवति । वृक्षानामभावे वर्षा-ऋतुरपि अनियन्त्रितोऽस्ति। वर्धमानाया: जनसंख्याया: खाद्यसमस्या मृत्तिकाया: प्रदूषणात् वृद्धिं गता। तस्मात् कारणात् यदि वयं सुखमयं शान्तिमयम् आरोग्यमयञ्च जीवनं वाञ्छाम:, तर्हि पर्यावरणस्य संरक्षणम् अवश्यमेव विधातव्यम् अस्माभि:।

**अन्तटीप्पणी-**

[i] अथर्ववेदे -10/7/32

[ii] ऋग्वेदे - 7/103/7

[iii] ऋग्वेदे - 10/137/2

[iv] ऋग्वेदे - 10/186/3

[v] ऋग्वेदे -10/137/4

[vi] ऋग्वेदे - 10/186/1

[vii] अथर्ववेदे 3/12/9

[viii] ऋग्वेदे 10/9/4

[ix] अथर्ववेदे - 3/13/5

[x] x अथर्ववेदे - 3/13/6

[xi] ऋग्वेदे - 10/9/3

[xii] अथर्ववेदे - 3/30/3

[xiii] अथर्ववेदे -1/34/2

[xiv] अथर्ववेदे - 6/135/2

[xv] अथर्ववेदे - 1/135/3

[xvi]अथर्ववेदे - 12/1/26

[xvii] अथर्ववेदे - 12/1/42

[xviii] अथर्ववेदे - 12/1/60

सन्धर्भग्रन्थसूची-

1.ऋग्वेदसंहिता, सम्पा- मोक्षमुलर, चौखम्वा पव्लिकेशन, वाराणसी, 1965 ।

2.शांखायणशाखिया ऋग्वेदसंहिता, सम्पा- रूपकिशोर शास्त्री, महर्षि सान्दीपनि राष्ट्रिय वेद विद्या प्रतिष्ठानम्, मध्यप्रदेश:, 2012।

3. वैदिकसंस्कृति, सम्पा- गोविन्द चन्द्र पाण्डे, लोकभारती प्रकाशन, इलाहावाद,2001।

4. ऋगर्थोद्धार:, सम्पा- वि. रङ्गनाथ-कट्टि:, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गालुरु, 2006।

5. ऋग्वेदसंहिता, सम्पा- ड. जियालाल कम्बोज, विद्यानिधि प्रकाशन, दिल्ली, 2004।

6. ऋग्वेदसंहिता, सम्पा- श्रीमन्मोक्षमुलरभट्ट:, कृष्णदास अकादमी, वाराणसी, 1983 ।

7. ऋक्सूक्तसंग्रह:, सम्पा- डा. हरिदत्त शास्त्री, साहित्य भाण्डार, हरिद्वार, 1992।

8. ऋकविधानम्, एम. वालाकृष्णरेडि, मात्रुशुनु, अन्ध्रप्रदेश: 2011 ।

9. वेदसूक्तमीमांसा, डा. गायत्री शुक्ला, प्रभाश्री विश्वभारती प्रकाशन, प्रयागराज,2019। 10. वेदस्वाध्यायप्रदीपिका, सम्पा- महात्मा गोपाल स्वामी सरस्वती, विजयकुमार गोविन्दराम् हासानन्द, दिल्ली 2001।

11. ऋग्वेद एक सरल परिचय:, डा. भवानीलाल, भारतीय सत्यम् बुक्स दिल्ली, 2007

12. वैदिकविनय: ,सम्पा- अभयदेव-विद्यालंकार:, संस्कार प्रकाशन,दिल्ली, 2002।

13. ऋग्वेदसंहिता, सम्पा- विश्वनाथ आहिताग्नि:, नागप्रकाशन, दिल्ली, 1661।

14. अथर्ववेद:,सम्पा- प्रभुदयालु अग्निहोत्री, ईस्टर्न-बुक लिंकस्, दिल्ली, 2005 ।

15. अथर्वन-कृत्या सूक्त, गृह्यकर्म एवं संस्कार, सम्पा- डा.बलदेव सिंह मेहरा, अभिषेक प्रकाशन, दिल्ली,2003।

16. अथर्ववेदीय परिवार का सूक्ष्म मनोवैज्ञानिक चित्रण, सम्पा- वीना विश्नोइ, आस्था प्रकाशन,दिल्ली, 2017।

17. अथर्वाङ्गिरस परम्परा में सांस्कृतिक मूल्य, सम्पा- मोतिलाल पुरोहित, प्रतिभा प्रकाशन, दिल्ली, 1998।

18. अथर्ववेद एवं स्मार्त संस्कृति, सम्पा- सुदेश गौतम्, प्रतिभा प्रकाशन,दिल्ली 2011।